दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लत्रयोदशी
आषाढः 13 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-245 | 1 | जून 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशे शिक्षकेभ्यः ३१ अगस्त-दिनाङ्कात् पूर्वं टी.ई.टी. परीक्षा उत्तीर्णीकर्तव्या भविष्यति

3 भूकंप-प्रभावित-वेनेजुएला-देशस्य सहायतार्थं भारतेन 'ऑपरेशन अमिस्ताद' इत्याख्यं अभियानं प्रारब्धम्

4 चण्डीगढ़े हिमाचलाय मिलेत् ७.१९ प्रतिशतं भागः, मुख्यमन्त्री-सुक्खूना पञ्जाबराज्यस्य राज्यपालस्य समीपे उत्थापिताः विषयाः

## नशा-मुक्त-भारत-अभियानं जनसहभागित्वेन चालितं जनान्दोलनं जातम् - प्रधानमन्त्री



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, नशा-मुक्त-भारत-अभियानं जनसहभागित्वेन चालितं जनान्दोलनं जातम्। मादकद्रव्यमुक्तभारत-निर्माणस्य महत्त्वविषये सामाजिक न्याय-सशक्तीकरण-राज्यमन्त्रिणः बी. एल वर्मायाः लेखं विनिमयी कुर्वन श्रीमोदी एतत अवोचत्। सामाजिकान्तर्जालीये पटले, प्रधानमन्त्रिणा प्रत्येकः नागरिकः मादकद्रव्यमुक्तस्य भारतस्य विकसित-भारतस्य च निर्माणाभियाने सम्मिलितुम् आमन्त्रितः । स्वस्य लेखे, श्रीवर्मा प्रत्यपादयत् यत्, मादकद्रव्याणां दुरुपयोगः भारतस्य यूनां भविष्येन, राष्ट्रस्य प्रगतिना च सम्बद्धः महत्त्वपूर्णो विषयः अस्ति इति सर्वकारः मन्यते। मन्त्रिणा देशस्य प्रत्येकं नागरिकः, विशेषतः यूनः, मादकद्रव्याणां दुरुपयोगस्य विरुद्धम् अस्मिन् राष्ट्रिय-अभियानस्य भागः भवितुम् आहूतः। सः अग्रे अवदत यत् अयं संकल्पः विकसितभारतस्य निर्माणाय निष्चप्रचं योग्यो भविष्यति ।

## अयोध्यायाः राममन्दिर-दानराशि-स्तेय-प्रकरणे अष्टौ जनाः निगडिताः



**हिमसंस्कृतवार्ता।** उत्तरप्रदेश-आरक्षकेण श्रीरामजन्मभूमि-तीर्थक्षेत्र-न्यासस्य दानराशि-स्तेय-प्रकरणे एफ.आई.आर इति प्रथम-सूचना-प्रतिवेदनाधारेण अष्टौ जनाः निगडिताः । इदं तावत् प्राथमिकं प्रतिवेदनं मुख्यमन्त्रिणः योगी आदित्यनाथस्य निर्देशेन 'विशेषनिरीक्षणदलस्य' अनुशंसानन्तरं पञ्जीकृतम आसीत् । इदं प्रकरणं श्रीरामजन्मभूमि-तीर्थक्षेत्र न्यासेन प्राप्तानां उपहाराणां दानानां च स्तेयसम्बन्धिनां आरोपाणां प्रकाशनान्तरं सम्मुखम् आगतम् । न्यासस्य अनुरोधे मुख्यमन्त्रिणा योगी आदित्यनाथेन एकस्य एस.आई.टी. दलस्य गठनस्य आदेशः दत्तः आसीत् । न्यासीय सदस्यस्य कृष्णमोहनस्य लिखित-अभियोगाधारेण 'श्रीरामजन्मभूमि-आरक्षककेन्द्रे अयं अभियोगः प्रविष्टः । आरोपितानां नामानि सन्ति अविनाश शुक्लः, अनुकल्प मिश्रः, लवकुश मिश्रः, मनीष कुमार यादवः, करुणेश पाण्डेयः, रमाशङ्कर मिश्रः, सुभाष श्रीवास्तवः, श्रीराम शङ्कर यादवः च । एतैः सह अन्ये केचन् अज्ञात-आरोपिताः अपि अस्मिन् प्रकरणे सम्मिलिताः सन्ति ।

## गृहमन्त्री अमितशाहः मादकद्रव्याणां विरुद्ध संयुक्त सङ्घर्षस्य आह्वानं कृतवान्




**हिमसंस्कृतवार्ता।** गृहमन्त्रिणा अमितशाहेन अद्य मादकद्रव्याणां विरुद्ध संयुक्त संघर्षस्य आह्वानम विहितम मादकद्रव्याणां प्रकोपः राष्ट्रियसुरक्षायै, सामाजिकस्थिरतायै, आर्थिकहिताय, यूनां देशस्य च भविष्याय भयं जनयति। सः आध्यात्मिकनेतृभ्यः, युवभ्यः, मातृभ्यः अस्य सङ्घर्षस्य कृते एकस्मिन मञ्चे आगत्य कार्यं कर्तुं च आग्रहम् अकरोत। श्रीशाहः नवदेहल्यां नार्को-कोआर्डिनेशन केन्द्रस्य दशम-शीर्ष-स्तरीय सभाम् अभिसंबोधयन् एतानि वक्तव्यानि प्रायच्छत् । श्रीशाहः अवदत यत चतुरोत्तर द्विसहस्रतः चतुर्दशाधिक द्विसहस्रपर्यन्तं अधिकारिणः प्रायः षड्विंशतिलक्षकिलोग्राममितं संश्लेषित-मादकद्रव्याणि गृहीतवन्तः । तस्य अपेक्षया, चतुर्दशाधिक द्विसहस्रतः षड्विंशत्यधिक द्विसहस्र पर्यन्तं गृहीतानि संश्लेषित-मादकद्रव्याणि अष्टदशांशोत्तर एकादश मिलियन किलोग्रामितं यावत वर्धितम् । सः अवदत यत् मादकद्रव्याणां व्यापारस्य विरुद्ध सर्वकारस्य अभियानं निरन्तरं प्रगतिं कुर्वत् अस्ति इति अङ्कैः ज्ञायते । मादकद्रव्याणां निवारणस्य प्रयत्नानां विषये श्रीशाहः अवदत यत नार्कोटिक्स कण्ट्रोल ब्यूरो इत्यनेन मादकद्रव्याणां अपराधसम्बद्धानां सूचनानां समयोचित-आदानप्रदानार्थं अनेकानि आनलाईन फलकानि इत्येतानि विकसितानि सन्ति ।

## पैक्स-सिलिका-सन्धौ कृत्रिमबुद्धिमत्ता आपूर्ति-शृङ्खलायै भारतेन सह चतुः त्रिंशत् देशानां हस्ताक्षरं जातम्

हिमसंस्कृतवार्ता। वाशिंगटन-नगरे आयोजिते द्वितीये 'पैक्स-सिलिका-शिखरसम्मेलने' भारतेन सह अन्यैः चतुः त्रिंशत् देशैः कृत्रिमबुद्धिमत्ता प्रविधीनां विकासाय विश्वसनीय-दृढ-आपूर्ति-शृङ्खलायाः निर्माणार्थ अमेरिका-नेतृत्वे एकस्मिन् महत्वपूर्ण-प्रस्तावे हस्ताक्षरं विहितम् । आर्थिकविषयाणाम् अमेरिका-उपसचिवः जैकब हेलबर्गः अवोचत् यत् ए.आई अवसरे संयुक्तविवरणम् इत्यस्य अन्तर्गतं प्रतिभागी-देशाः एआई-युगे विकास-अनुकूलं नवीनता-अनुकूलं च नियामक दृष्टिकोणं प्रति सहमतिं प्रदर्शितवन्तः। प्रतिनिधिभिः सह संवादे श्रीहेलबर्गः प्रतिपादितवान् यत् अमेरिका भारतेन सह स्वस्य सहभागितां सुदृढीकर्तुं सोत्साहम् अग्रे आयाति । अस्मिन शिखरसम्मेलने भारतस्य प्रतिनिधित्वं इलेक्ट्रॉनिक्स-सूचना प्रौद्योगिकी-मन्त्रालयस्य सचिवेन एस कृष्णन महोदयेन अथ च भारतीय-उद्द्योग-क्षेत्रस्य प्रतिनिधिभिः कृतम् ।

## सुभाषितम्

**रोहते सायकैर्विद्धं,**
**वनं परशुना हतम्।**
**वाचा दुरुक्तं बीभत्सं,**
**न संरोहति वाक्क्षतम्।।**
**(महाभारत, उद्योगपर्व- ३४/७८)**

अर्थात्- बाणों से बिन्धा हुआ शरीर ठीक हो जाता है, कुल्हाड़ी से काटा गया वन फिर से हरा-भरा हो जाता है। परन्तु दुर्वचनों (कड़वी वाणी) से हुआ गहरा मानसिक आघात कभी नहीं भरता।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## यू.एस.ओपन' बैडमिंटन-प्रतियोगितायाम् भारतस्य युवा-क्रीडकः रौनक चौहानः चीनी-ताइपे- क्रीडकं 'चौ तिएन चेन' इत्यमुमं पराजित्य प्रागुपांत्य-चक्रं प्राविशत्

भारतस्य रौनक चौहानेन फुलर्टन मगरे यु..एस.ओपन-बैडमिण्टन-प्रतियोगितायां चीनी-ताईपे इत्यस्य पुरुष एकलस्य क्रीडकं चाऊ-टियेन चेन इत्येतम् एकविंशति-सप्तदश, षड्विंशति-चतुर्विंशति अङ्कैः पराजित्य प्रागुपान्त्य चक्रीयद्वन्द्वे पदार्पणं कृतम् । किदंबी श्रीकान्तः मलेशिया देशस्य ली जी जिया-इत्यमु एकविंशति-चतुर्दश, एकविंशति-त्रयोदश अङ्कैः पराजित्य प्रगुपान्त्य चक्रीयद्वन्द्वे प्रविष्टवान्। महिला एकल-क्रीडायां तन्वी शर्मा, रक्षिता श्री, देविका सिहागः च अन्तिम अष्ट-चरणे प्रविष्टवत्यः ।

# हिमाचलप्रदेशे शिक्षकेभ्यः ३१ अगस्त-दिनाङ्कात् पूर्वं टी.ई.टी. परीक्षा उत्तीर्णीकर्तव्या भविष्यति




**हिमसंस्कृतवार्ताः — शिमला।**
हिमाचलसर्वकारेण सेवारतेभ्यः शिक्षकेभ्यः (इन-सर्विस टीचर्स) 'शिक्षक-पात्रता-परीक्षा' (टी.ई.टी.) अधिकृत्य महत्त्वपूर्णाः निर्देशाः प्रसारिताः। एषः निर्णयः सर्वोच्च-न्यायालयस्य (सुप्रीम कोर्ट) १ सितम्बर २०२५ तमवर्षस्य निर्णयस्य तथा च २९ मई २०२६ तमे दिनाङ्के पारितस्य पुनर्विचार-आदेशस्य अनुपालने गृहीतः, यस्मिन् कार्यरतेभ्यः शिक्षकेभ्यः टी.ई.टी. उत्तीर्णं कर्तुं प्रदत्ता समयसीमा वर्षद्वयात् (२ वर्षात्) वर्धयित्वा वर्षत्रयं (३ वर्षाणि) कृता अस्ति। सर्वकारेण स्पष्टीकृतं यत् येषां कार्यरतानां शिक्षकाणां कृते टी.ई.टी. परीक्षा अनिवार्या वर्तते, तैः ३१ अगस्त २०२८ तमवर्षं यावत् एषा परीक्षा उत्तीर्णीकर्तव्या भविष्यति। एतदर्थं प्रारम्भिकशिक्षाविभागाय तादृशानां सर्वेषां शिक्षकाणां सूचीं सज्जीकर्तुं निर्देशाः दत्ताः, यैः अधुना यावत् टी.ई.टी. परीक्षा न उत्तीर्णिता। सर्वकारेण सर्वान् उपनिदेशकान्, खण्ड-प्रारम्भिक-शिक्षा-अधिकारिणः (BEEO), विद्यालयप्रमुखान् तथा च सम्बद्धान् शिक्षकान् निर्देशिताः यत् ते सुनिश्चितं कुर्युः यत् सर्वे पात्राः शिक्षकाः निर्धारिते समये एव टी.ई.टी. परीक्षां उत्तीर्णं कुर्युः। अनेन सहैव हिमाचलप्रदेश-स्कूल-शिक्षा-बोर्ड-धर्मशाला इत्यनेन सह समन्वयं प्रस्थाप्य कार्यरतेभ्यः शिक्षकेभ्यः वर्षे न्यूनतम् वारद्वयं (२ वारं) विशेष-टी.ई.टी.-परीक्षायाः आयोजनं कर्तुं तथा च परीक्षापाठ्यक्रमस्य व्यापकं प्रचार-प्रसारं सुनिश्चितं कर्तुं निर्देशाः अपि जा

कृताः। शिक्षाविभागेन एषः सम्पूर्णः विषयः अतीव आवश्यकः समयबद्धश्च प्रख्यापितः, सम्बद्धानाम् अधिकारिणां सद्यः आवश्यकीं प्रक्रियां विधातुं विभागं च प्रति अविलेन कार्यविवरणं (रिपोर्ट) प्रेषयितुं कथितम् अस्ति।

# एस.पी.यू. मण्डीः सरदार-पटेल-विश्वविद्यालये २६ पदेषु नियुक्तिः भविष्यति,

## साक्षात्कारस्य समयसारिणी प्रसारिता




**हिमसंस्कृतवार्ताः- शिमला ।** सरदार-पटेल-विश्वविद्यालयेन (एस.पी.यू.) मण्डी इत्यनेन विभिन्नविभागेषु अतिथि-सङ्कायस्य (गेस्ट फैकल्टी) नियुक्तये 'वाक-इन' साक्षात्कारस्य समयसारिणी प्रसारिता। एषा नियुक्तिः अस्थायी- आधारेण (तदर्थरूपेण) भविष्यति। जुलाई-मासस्य १४ दिनाङ्कतः १८ दिनाङ्कपर्यन्तं १० विभागेषु साक्षात्काराः आयोजयिष्यन्ते। एतेषु सङ्गणकविज्ञानं, भौतिकशास्त्रम्, आङ्ग्लभाषा, रसायनशास्त्रम्, औद्योगिकरसायनशास्त्रं, वनस्पतिविज्ञानं, प्राणिविज्ञानं, पर्यावरणविज्ञानम्, इतिहासः, लोकप्रशासनविभागाः च सम्मिलिताः सन्ति। अस्याः प्रक्रियायाः अन्तर्गतं आहत्य २६ पदानि पूरयिष्यन्ते। पर्यावरणविज्ञानविभागे पञ्च (५) पदानि सन्ति। यदा च सङ्गणकविज्ञाने, औद्योगिकरसायने, लोकप्रशासने च चत्वारि- चत्वारि (४-४) पदानि नियुक्तानि भविष्यन्ति।भौतिकशास्त्रे, वनस्पतिविज्ञाने, प्राणिविज्ञाने च द्वे-द्वे (२-२) पदे, इतिहासे, रसायने, आङ्ग्लभाषायां च एकैकं (१-१) पदं नियुक्तये निश्चितम् अस्ति। अभ्यर्थिभिः 'यूजीसी' नियमावली 2018 (२०१८) इत्यस्याः अन्तर्गतं निर्धारिता न्यूनतमयोग्यता पूरणीया भविष्यति। प्रलेख- सत्यापनाय साक्षात्कारसमयात् एकहोरापूर्वं विश्वविद्यालयं प्रापणं अनिवार्यं वर्तते। विश्वविद्यालयस्य कुलपतेः प्रो. ललित कुमार अवस्थी महोदयस्य अनुसारं आवश्यकतानुसारं रिक्तपदानां सङ्ख्यायां साक्षात्कार-सारिण्यां च परिवर्तनं कर्तुं शक्यते।

**मुख्यसूचना-** साक्षात्काराः १४ जुलाईतः १८ जुलाई २०२६ पर्यन्तं भविष्यन्ति। अभ्यर्थिभिः साक्षात्कारसमयात् १ होरा पूर्वं प्रापणीयम्।

# धर्मशालायां मुख्यमन्त्रिणः सुक्खू महोदयस्य सहसा आगमनेन तीव्रीभूता राजनैतिकः सङ्क्षोभः

हिमसंस्कृतवार्ताः — धर्मशाला।मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य पूर्वनिर्धारिते कार्यक्रमे अन्तिमसमये संजातेन परिवर्तनेन काँगड़ामण्डलस्य राजनीतिषु नूतनाः विमर्शाः जनिताः। पूर्वे प्रसरितानुसारं मुख्यमन्त्री २७ जून् दिनाङ्कस्य प्रातः गगल-विमानपतनं प्राप्य मार्गमार्गेण 'बड़ा भङ्गाल' क्षेत्रं गन्तुमनाः आसीत्, परन्तु अधुना चण्डीगढ़तः साक्षात् शिमलां प्रतिनिवर्तनस्यापेक्षया तस्य सहसा धर्मशालायां स्थगनं राजनैतिकवीथिषु चर्चायाः विषयः सञ्जातः अस्ति। मुख्यमन्त्रिणः एषः प्रवासः तादृशे समये भवति, यदा २७ जून् दिनाङ्के काँगड़ा-मण्डलपरिषदः नवनिर्वाचित-परिषदः परिचयगोष्ठी प्रस्ताविता वर्तते। अपरपक्षे २९ जून् दिनाङ्के धर्मशाला-नगरनिगमस्य नवनिर्वाचितानां पार्षदानां शपथग्रहणसमारोहः अपि आयोजयिष्यते। एतादृश्यां स्थितौ मुख्यमन्त्रिणः धर्मशालायां उपस्थितिः अनयोः द्वयोः महत्त्वपूर्णयोः स्थानीयनिकाययोः गतिविधिभिः सह सम्बद्धा दृश्यते।

राजनैतिकक्षेत्रेषु एषा चर्चा वर्तते यत् मुख्यमन्त्री स्थानीयनिकायानां सङ्घटनात् परं दलस्य आगामिरणनीतिं सङ्गठनात्मकसमन्वयं च अधिकृत्य वरिष्ठनेतृभिः जनप्रतिनिधिभिः च सह अनौपचारिकोपवेशनानि कर्तुं शक्नोति। यद्यपि, सर्वकारपक्षतः प्रशासनपक्षतः वा अस्मिन् विषये कोऽपि आधिकारिकः कार्यक्रमः न प्रसारितः। मुख्यमन्त्रिणः धर्मशालाप्रवासं प्रति एतदपि मन्यते यत् नगरनिगमे मण्डलपरिषदि च स्रक्ष्यमाणेभ्यः आगामि-राजनैतिकसमीकरणेभ्यः विकासयोजनाभ्यश्च महत्त्वपूर्णाः सङ्केताः प्राप्तुं शक्यन्ते।

एतस्मात् पूर्वं शुक्रवासरे सायङ्काले मुख्यमन्त्रिणः चक्रविमानं (हेलिकॉप्टर) गगल-विमानपतने अवतीर्णं, यत्र काङ्ग्रेसनेतृभिः विभिन्नसङ्घटनैश्च तस्य स्वागतं विहितम्। अस्मिन् अवसरे काङ्ग्रेसनेता देवेन्द्रजग्गी, एपीएमसी-अध्यक्षः निशु मोगरा, ब्लॉक-काङ्ग्रेस-धर्मशालायाः अध्यक्षः हरभजनसिंहः समेताः बहवः नेतारः कार्यकर्तारश्च उपस्थिताः आसन्। पत्रकारैः सह सम्भाषणे मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खूना कथितं यत् मुख्यमन्त्रिरूपेण 'बड़ा भङ्गाल' क्षेत्रस्य अयम् तस्य प्रथमः प्रवासः अस्ति। तेन ज्ञापितं यत् गतेषु १४ वर्षेषु केनापि मुख्यमन्त्रिणा अस्य दुर्गमस्य पृष्ठीभूतस्य च क्षेत्रस्य प्रवासः न कृतः। तेन उक्तं, "मम मुख्यमुद्देश्यं 'बड़ा भङ्गाल' गत्वा तत्रत्यानां जनानां समस्याः साक्षात् अवगन्तुं वर्तते। अहम् एतत् द्रष्टुम् इच्छामि यत् तत्र विकासस्य के के नूतनाः व्यापाराः कर्तुं शक्यन्ते तथा च सर्वकारीययोजनानां लाभः अन्तिमव्यक्तिं यावत् कथं प्रापयेत्। तत्रत्याः कठिनाः परिस्थितयः स्थले गत्वा एव सम्यक्तया अवगन्तुं शक्यन्ते।"



## दिव्याङ्गाः, भूमिहीनाः, मनरेगा-श्रमिकाः अधुना बी.पी.एल. परिधौ; आयकरदातारः, ७५ सहस्रात् अधिक-आययुताः च भविष्यन्ति बहिः

# बी.पी.एल. चयनस्य अष्टमः पर्यायः आरब्धः, नूतनाः मानदण्डाः प्रवृत्ताः



**हिमसंस्कृतवार्ताः — शिमला।** राज्यसर्वकारेण बी.पी.एल. परिवाराणां चयनप्रक्रियाम् अधिकं पारदर्शिनीं निर्धनानां हिते च विधातुं पात्रतायाः अपात्रतायाश्च मानदण्डेषु महत्त्वपूर्णानि परिवर्तनानि प्रवर्तितानि। नूतनप्रावधानानां अन्तर्गतम् अधुना तादृशेभ्यः परिवारेभ्यः प्राधान्यं प्रदास्यते, ये आर्थिकरूपेण दुर्बलाः सन्ततः साकमेव सामाजिकानां स्वास्थ्यसम्बन्धिनां च कठिनानां परिस्थितीनां सम्मुखीकरणं कुर्वन्तः सन्ति। यत्रैव आर्थिकरूपेण सक्षमाः परिवाराः बी.पी.एल. सूच्याः बहिः स्थापयितुं निर्णयः विहितः, येन सर्वकारीययोजनानां लाभः केवलं वास्तविकानां पात्राणां परिवाराणां समीपं प्रापेत्। एषः बी.पी.एल. चयनस्य अष्टमः पर्यायः (चरण) भविष्यति। सर्वकारेण प्रसारित-नूतनप्रावधानानुसारं, तादृशाः परिवाराः येषां प्रमुखाः ४० प्रतिशतं वा तस्मात् अधिकं दिव्यांगतायुक्ताः सन्ति, ते बी.पी.एल. सूच्यां समावेष्टुं प्रावधानं कृतम् अस्ति। एतदतिरिच्य ते परिवाराः अपि पात्राः भविष्यन्ति, येषां सर्वे वयस्काः सदस्याः गते वित्तीयवर्षे 'महात्मा गान्धी राष्ट्रिय ग्रामीण रोजगार गारण्टी योजना' (मनरेगा) इत्यस्याः अन्तर्गतं न्यूनतम् एकं दिनं यावत् रोजगारं प्राप्तवन्तः स्युः। सर्वकारस्य मान्यता अस्ति यत् मनरेगा-आश्रिताः परिवाराः आर्थिकरूपेण दुर्बलवर्गे आगच्छन्ति, अतः तेभ्यः प्राथमिकता प्रदास्यते।अनेन सहैव ते परिवाराः अपि बी.पी.एल. सूच्यां समाविष्टाः भविष्यन्ति, येषां धनार्जनकर्तारः सदस्याः कर्कटदोषेण (कैंसर), अल्जाइमर, पार्किंसंस, मस्कुलर डिस्ट्रॉफी, हीमोफीलिया, थैलेसीमिया अथवा अन्याभिः गम्भीराभिः व्याधिभिः ग्रसिताः भूत्वा स्थायीरूपेण कार्यं कर्तुम् असमर्थाः संजाताः। तादृशाः परिवाराः, येषां धनार्जनकर्तारः सदस्याः कस्याञ्चित् दुर्घटनायां कशेरुकायाम् (रीढ़ की हड्डी) गम्भीरक्षतेः कारणेन स्थायीरूपेण शय्याग्रस्ताः अथवा पूर्णरूपेण निष्क्रियाः अभवन्, ते अपि पात्राः मन्स्यन्ते। एतद्विहाय भूमिहीनाः परिवाराः अपि बी.पी.एल. चयनस्य परिधौ सम्मीलिताः कृताः सन्ति। अपरपक्षे सर्वकारेण स्पष्टीकृतं यत् आर्थिकरूपेण सक्षमेभ्यः परिवारेभ्यः बी.पी.एल. सूच्याः लाभः नैव मिलिष्यति। अस्य अन्तर्गतं ये परिवाराः आयकरं ददति, ते स्वतः एव अपात्राः मन्स्यन्ते। येषां परिवाराणां सर्वश्रोतोभ्यः वार्षिकी आयः ७५ सहस्र (७५,०००) रूप्यकेभ्यः अधिका अस्ति, ते अपि बी.पी.एल. सूच्यां न समावेक्ष्यन्ते। एवमेव एक-हेक्टेयर परिमितात् अधिकां कृषियोग्यां भूमिं धारयन्तः परिवाराः अपि अस्याः श्रेण्याः बहिः स्थास्यन्ति। यदि कस्यापि परिवारस्य कोऽपि सदस्यः सर्वकारीय-अर्धसर्वकारीय-वैयक्तिक (निजी) क्षेत्रेषु वा नियमितरूपेण कार्यं (नौकरी) करोति, तर्हि तादृशः परिवारः अपि बी.पी.एल. सूच्याः कृते पात्रः न भविष्यति।

## भूकंप-प्रभावित-वेनेजुएला-देशस्य सहायतार्थं भारतेन 'ऑपरेशन अमिस्ताद' इत्याख्यं अभियानं प्रारब्धम्



हिमसंस्कृतवार्ता। वेनेजुएला-देशे आगतानां विनाशकारि-भूकम्पानां पश्चात् भारतेन 'ऑपरेशन अमिस्ताद' इत्याख्यस्य अभियानस्य आरम्भः कृतः अस्ति। अनेन भूकम्पेन महता प्रमाणेन जनधनयोः हानिः अभवत्। 'ऑपरेशन अमिस्ताद' वेनेजुएला-देशस्य जनैः सह ऐक्यं (एकजुटतां) प्रदर्शयितुं एका मानवीया सहायता आपदा-निवारण-अभियानं च अस्ति। वैदेशिककार्यमन्त्रालयेन एकेन वक्तव्येन (बयानेन) उक्तं यत् अस्य अभियानस्य अन्तर्गतं, भारतीयवायुसेनायाः द्वे 'सी-17 ग्लोबमास्टर' विमाने अद्य प्रातः वेनेजुएला-देशं प्रति प्रस्थिते। अस्मिन् अभियाने मानवीया सहाय्यसामग्री ४१-सदस्यीयं रक्षकदलं च सम्मिलितानि सन्ति।

### सहाय्यसामग्र्याः विवरणम्

भारतीयसेनायाः एका फील्ड-अस्पताल-इकाई यस्यां HADR-पॅलेट्स् औषधानि च सन्ति। ३० टन परिमिता राहतसामग्री, ६ टन परिमितानि औषधानि चिकित्सा-उपकरणानि च।: द्वौ 'भीष्म क्यूब' नामकौ चलिष्णू (पोर्टेबल) चिकित्सालयौ। अनुभवीनां रक्षककर्मचारिणां चिकित्साविशेषज्ञानां च एतत् ४१-सदस्यीयं दलं प्रभावितेषु क्षेत्रेषु अन्वेषण-रक्षण-अभियानेषु वेनेजुएला-देशस्य अधिकारिभिः सह मिलित्वा कार्यं करिष्यति। वैदेशिककार्यमन्त्रालयेन ज्ञापितं यत् भारतम् अस्मिन् कठिने समये वेनेजुएला-सर्वकारेण तत्रत्यैः जनैः च सह स्कन्धेन स्कन्धं मिलायित्वा (दृढतया) तिष्ठति। भारतेन शोकाकुलेभ्यः परिवारेभ्यः प्रति गभीरा संवेदना प्रकटीकृता, क्षतानां (घायलों) च शीघ्र-स्वास्थ्यलाभस्य कामना कृता अस्ति।

## शिक्षामन्त्री धर्मेन्द्रप्रधानः भूटानदेशस्य शिक्षामन्त्रिणा यीज़ांग दे थापा महोदयेन सह अमिलत्



शिक्षामन्त्री धर्मेन्द्रप्रधानः भूटानदेशस्य शिक्षामन्त्रिणा यीज़ांग दे थापा महोदयेन सह मेलनम् अकरोत्। सामाजिकमाध्यमस्य (सोशल मीडिया) एकस्मिन् सन्देशे श्रीप्रधानः अवदत् यत् इयं चर्चा शिक्षकाणां प्रशिक्षणं, कौशलविकासं तथा च रोज़गारक्षमतां, डिजिटल-शिक्षां, कृत्रिमप्रज्ञां (आर्टिफिशियल इंटेलिजेंस), सततं पर्यटनं, पारम्परिकचिकित्सां तथा च समग्रस्वास्थ्यं यावत् केन्द्रीकृता आसीत्।शिक्षामन्त्रिणा कथितं यत् द्वयोः देशयोः समीपे शिक्षा, नवोन्मेषः (नवाचारः) तथा च क्षमतानिर्माणस्य विशालेषु मञ्चेषु परस्परं सहयोगं कर्तुं प्रचुराः सम्भावनाः सन्ति। सः अवदत् यत् भारत-भूटानदेशयोः भागीदारी भविष्यस्य साझा-आकाङ्क्षासु तथा च आध्यात्मिकबन्धनेषु आधारिता अस्ति। सः शिक्षा, कौशलं तथा च ज्ञानसहभागितायाः क्षेत्रे भारत-भूटानदेशयोः सहयोगस्य उपरि बलं दत्तवान्।

# चण्डीगढ़े हिमाचलाय मिलेत् ७.१९ प्रतिशतं भागः, मुख्यमन्त्री-सुक्खूना पञ्जाबराज्यस्य राज्यपालस्य समीपे उत्थापिताः विषयाः



**हिमसंस्कृतवार्ताः — शिमला।**
मुख्यमन्त्रिणा ठाकुर-सुखविन्दरसिंहसुक्खूना शुक्रवासरे पञ्जाबराज्यस्य राज्यापालेन चण्डीगढ़स्य प्रशासकेन च गुलाबचन्दकटारियामहोदयेन सह शिष्टाचारमेलनं कृतं तथा च हिमाचलप्रदेशस्य प्रलम्बितानां (लंबित) अतीव महत्त्वपूर्णानां च विषयाणाम् उपरि विस्तृता चर्चा विहिता। तेन राज्यपालात् एतेषां प्रकरणानां सद्यः न्यायोचित-समाधानाय सहयोगप्रदानस्य आग्रहः कृतः। मुख्यमन्त्रिणा केन्द्रशासितप्रदेशे चण्डीगढ़े हिमाचलप्रदेशस्य वैध-७.१९ प्रतिशतभागस्य अधिकारं पुनः प्रकटीकृतम्। सः अवदत् यत् 'पञ्जाब पुनर्संरचना अधिनियम, १९६६' इत्यस्य प्रावधानानाम् अनुसारं हिमाचलप्रदेशः तत्कालीनस्य अविभाजितपञ्जाबस्य उत्तराधिकारी राज्यम् अस्ति, राज्ये च हस्तान्तरितक्षेत्राणां जनसङ्ख्यायाः अनुपाते चण्डीगढ़े भागं प्राप्तुम् अधिकारः वर्तते। तेन कथितं यत् चण्डीगढ़स्य विकासः अविभाजितपञ्जाबस्य संयुक्तसंसाधनैः कृतः आसीत्। गतेभ्यः पञ्चदशकेभ्यः पञ्जाब-हरियाणा राज्ये अस्य नगरस्य भूमेः, सम्पत्तीनां, प्रशासनिकव्यवस्थायाश्च लाभं प्राप्नुवन्तः सन्ति, यत्रैव हिमाचलप्रदेशः अधुना यावत् स्वकीयात् वैध-अधिकारात् वञ्चितः अस्ति। अतः तेन आग्रहः कृतः यत् हिमाचलप्रदेशाय चण्डीगढ़े तस्य ७.१९ प्रतिशतं वैधानिकं भागं प्रदीयेत।मुख्यमन्त्रिणा चण्डीगढ़े एकस्य अतिरिक्तस्य 'हिमाचल सदन' भवनस्य निर्माणस्य आवश्यकतायाः विषयः अपि प्रमुखरूपेण उत्थापितः। तेन उक्तं यत् दशकपूर्वं निर्मितं वर्तमानं 'हिमाचल भवन' अधुना राज्यस्य जनानां वर्धमानानाम् आवश्यकतानां पूर्तये सक्षमं नास्ति। हिमाचलप्रदेशस्य छात्राणां, रोगिणां, अन्यनागरिककाणां च कृते उच्चशिक्षा-स्वास्थ्यसेवा-प्रशासनिककार्याणां कृते चण्डीगढ़ं कश्चन मुख्यकेन्द्रम् अस्ति। विशेषरूपेण पीजीआई (PGI) चण्डीगढ़े प्रतिमासं चिकित्सार्थं महत्यां सङ्ख्यायां रोगिणः आगच्छन्ति। तेन ज्ञापितं यत् चण्डीगढ़प्रशासनेन सह विमर्शानन्तरं 'सेक्टर-५२' मध्ये ४.७३६ एकड़ परिमिता भूमिः हिमाचलसदनस्य निर्माणार्थं चिह्निता कृता अस्ति।
मुख्यमन्त्रिणा भाखड़ा-ब्यास-प्रबन्धन-मण्डलात् (BBMB) सम्बद्धानां सुदीर्घकालात् प्रलम्बितानां वित्तीयदेयतानां सद्यः निस्तारणाय विषयः अपि उत्थापितः। सः अवदत् यत् सर्वोपरि-न्यायालयेन (सुप्रीम कोर्ट) हिमाचलप्रदेशस्य बीबीएमबी-परियोजनासु ताभिः सम्बद्धेषु लाभेषु च ७.१९ प्रतिशतभागस्य अधिकारः स्वीकृतः अस्ति। तेन प्रतिपादितं यत् राज्यं गतात् एकदशकात् अपि अधिकसमयात् १३,०६६ मिलियन-यूनिट् परिमितायाः विद्युतं तस्याः सम्बद्धानां वित्तीयदेयतानां च प्राप्तये प्रतीक्षां कुर्वन् अस्ति।मुख्यमन्त्रिणा 'शानन जलविद्युत्परियोजनायाः' विषयः अपि राज्यपालस्य सम्मुखं प्रस्थापितः। तेन कथितं यत् तत्कालीन-मण्डीरियासतं कदापि संयुक्तपञ्जाबस्य भागं नासीत्। मण्डीरियासतेन वर्षे १९४८ मध्ये भारतीयसङ्घे विलयः कृतः आसीत्। एतस्मात् परं वर्षे १९५१ मध्ये हिमाचलप्रदेशाय 'भाग-सी' राज्यस्य पदं प्राप्तं तथा च १ नवम्बर १९५६ तमे दिनाङ्के एषः केन्द्रशासितप्रदेशः घोषितः।तेन उक्तं यत् शाननजलविद्युत्परियोजना हिमाचलप्रदेशस्य मण्डीमण्डले स्थिता अस्ति, या 'पञ्जाब पुनर्गठन अधिनियम, १९६६' इत्यस्य धारा २(एन) मध्ये परिभाषितानां हस्तान्तरितक्षेत्राणां भागः कदापि नासीत्। अतः अस्यां परियोजनायाम् उक्तस्य अधिनियमस्य प्रावधानाः नैव प्रवर्तन्ते, परियोजनायाः उपरि कस्यापि प्रकारस्य अधिकारः वक्तुं न शक्यते। मुख्यमन्त्रिणा अवदत् यत् शाननजलविद्युत्परियोजनासम्बद्धा ९९ वर्षाणां 'लीज' (पट्टा-अवधिः) २ मार्च २०२४ तमे दिनाङ्के समाप्ता संजाता। अवधेः समापनेन सहैव लीजसम्बद्धाः सर्वे अधिकाराः स्वतः एव समाप्ताः अभवन्। एतादृश्यां स्थितौ समाप्त-लीज-आधारेण परियोजनायाः सञ्चालन-प्रबन्धन-अधिकारस्य वा कोऽपि अधिकारः वैधानिकदृष्ट्या निराधारः वर्तते। मुख्यमन्त्री विश्वासं प्रकटितवान् यत् एतेषां सर्वेषां प्रलम्बितानां विषयाणां समाधानं रचनात्मकसंवादेन, पारस्परिकसम्मानेन, सहकारी-सङ्घवादस्य भावनायाः च अनुरूपं कर्तुं शक्यते।

# "लौकिकन्यायकोशः"

## "एरण्डबीजन्यायः"



एरण्डवृक्षस्य बीजं वृक्षात् च्युतं चेत् तत् उपरि उड्डयमानं भूत्वा दूरं गच्छति इति वदन्ति। तथैव मनुष्योऽपि यदा विभिन्नेभ्यः बन्धनेभ्यःमुक्तः भवति तदा सः उपरि गच्छति अर्थात् तस्य प्रगति भवति इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर, पुणे / महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। जर्मनदेशस्य एकस्मिन् सरोवरतटे विचित्रः नियमः कृतः। यैः जनैः जर्मनभाषा न ज्ञायते, तैः तत्र तरणं कर्तुं न शक्यते। एषः नियमः सुरक्षार्थं कल्पितः इति प्रबन्धकेन उक्तम्।
**काव्या-** आम् नन्दिनि, एषः अतीव विचित्रः नियमः! भाषा-ज्ञानेन विना तरणं निषिद्धं जातम् इति तु आश्चर्यकरम्। अधुना द्वितीया वार्ता श्रूयताम्। तेक्ससप्रान्ते 'ग्रेसी' नामिका एका चित्रोष्ट्री नष्टा। सा एकस्मात् अरण्यात् पलायनं कृतवती अस्ति। अन्वेषकैः सा अद्यापि न प्राप्ता।
**नन्दिनी-** सत्यं काव्ये, चित्रोष्ट्र्याः पलायनं तु हास्यकरम्! सा शीघ्रं प्राप्येत इति आशासे। अपरं च, तेक्सस्-प्रान्ते एव मधुमक्षिकाभिः पूर्णं महद् वाहनं विपर्यस्तम्। तेन कारणेन विंशतिलक्ष-मिताः मधुमक्षिकाः इतस्ततः प्रसृताः। सर्वैः जनैः गृहे एव स्थितम्, द्वाराणि च पिहितानि।
**काव्या-** मया मन्यते तत्रत्यैः जनैः महद् भयं सोढम्! विंशति-लक्षं मक्षिकाः अतीव भीषणाः स्युः। इदानीं चतुर्थी वार्ता कथ्यते। आस्ट्रिया-देशे एकेन कृषकेण मेषाणां कृते विशिष्टं लौह-शृङ्खला- कवचं रचितम्। वृकाणाम् आक्रमणात् मेषान् रक्षितुम् एषः उपायः तेन कृतः।
**नन्दिनी-** सत्यम्, मेषाणां कृते लौह-कवचस्य कल्पनं खलु अपूर्वम्! कृषकस्य बुद्धिः श्लाघनीया। अहम् एतां वार्तां पूर्वं पठितवती अस्मि। अद्यतनाः वार्ताः अत्रैव समाप्यन्ते। श्वः पुनः मेलिष्यामः। धन्यवादः।